# अलङ्काराणाम् उद्भवे मनोवैज्ञानिकप्रक्रिया

**डॉ. संदीप वसन्त जोशी**

वरिष्ठशोधाध्येता, सं.सं.प्र.

Sandeep.joshi993@gmail.com

## सारांशः

*अलङ्काराणां केवलं बहिरङ्गत्वं स्वीकर्तुं न शक्यते । आलङ्कारिकाणां मतानुसारम् अलङ्काराः न केवलं वाणीं भूषयन्ति अपि तु भावाभिव्यक्तौ सहायकाः अपि भवन्ति । एतेषाम् अलङ्काराणाम् उद्भवे काचित् मनोवैज्ञानिकी प्रक्रिया अस्ति । अस्याः प्रक्रियायाः कल्पना, स्मृतिः, बिम्बप्रतिबिम्बभावः, प्रतीकीकरणम् इति एते अंशाः सन्ति । एतेषाम् अंशानां वर्णनं कृत्वा सोदाहरणम् एषा प्रक्रिया अस्मिन् लेखे प्रतिपादिता अस्ति ।*

## प्रस्तावना

**अपारे काव्यसंसारे कविरेकः प्रजापतिः ।**
**यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥**[1]

अपारस्य काव्यसंसारस्य निर्माता भवति कविः । तस्मै यथा रोचते तथा काव्यसंसारं सृजति सः । इयं काव्यसृष्टिः भवति तस्य मानससृष्टिः । सृष्टिगतान् विभिन्नविषयान् कविः अनुभवति परन्तु बाह्यवस्तूनां यथावत् वर्णनं सः न करोति । अनुभूतं वस्तु कविः प्रतिभया तथा उपस्थापयति येन तत् चमत्कारजनकं लोकानन्दकरं च स्यात् । अतः कवेः रचना तस्य मनः प्रतिबिम्बयति । यथा दुष्यन्तशकुन्तलयोः कथा ब्राह्मणग्रन्थादिषु अपि प्रतिपादिता अस्ति परं कविकुलगुरोः कालिदासस्य प्रतिभास्पर्शात् अभिज्ञानशाकुन्तले यत् कथावस्तु प्रकटितं तत् अभूतपूर्वम् एव अस्ति । तत्र लक्षिताः सूक्ष्माः मनोभावाः निसर्गस्य अपि मनोव्यापाराः न केवलं चमत्कारं जनयन्ति अपि तु कवेः मनोभावान् अपि प्रकटयन्ति । अतः मनोव्यापारस्य अध्ययनम् एव मनोविज्ञानम् इति मनोविज्ञानस्य व्याख्यां पश्यामः चेत् साहित्यशास्त्रं नास्ति मनाक् अपि अस्पृष्टं मनोविज्ञानात् ।

**'विभावानुभावव्यभिचारिभावसंयोगात् रसनिष्पत्तिः'** इति रससूत्रं प्रतिपादितम् अस्ति भरताचार्येण । इमां रसप्रक्रियां पश्यामः चेत् अपि ज्ञायते यत् एषा प्रक्रिया सर्वात्मना मनोभावान् आश्रयते । अत्र उक्ताः व्यभिचारिस्थायिभावाः चित्तवृत्तिविशेषाः एव । विभावादिभिः उद्बुद्धाः स्थायिभावाः एव रसपदेन व्यपदिश्यन्ते । रसाभिव्यक्तौ सहायकाः भवन्ति अलङ्काराः । अतः अलङ्काराणां केवलं बहिरङ्गत्वं स्वीकर्तुं न शक्यते । आलङ्कारिकाणां मतानुसारम् अलङ्काराः न केवलं वाणीं भूषयन्ति अपि तु भावाभिव्यक्तौ सहायकाः अपि भवन्ति । अत एव तादृशं किञ्चन काव्यं न दृश्यते यत्र अलङ्काराः न स्युः ।

[1] अग्निपुराणम् ३३९.१०

काव्यनिर्मितिः भावावेशात् जायते। एते भावाः शब्दार्थानां माध्यमेन प्रकटिताः भवन्ति। भावानां शब्दार्थाभ्यां प्रकटनस्य अनेके मार्गाः सन्ति। अतः **'अनन्ता हि वाग्विकल्पाः'** इति आनन्दवर्धानाचार्येण उक्तम्। एते वाग्विकल्पाः एव अलङ्काराः। भावावस्थायाम् एव अलङ्काराः अपृथग्यत्नेन प्रकटिताः भवन्ति।

अलङ्कारस्य सम्बन्धः केनचित् विशिष्टभावेन न भवति। उपमादीनाम् अलङ्काराणां प्रयोगः यथा सुखस्याभिव्यक्तौ भवति तथा दुःखस्याभिव्यक्तौ अपि भवति। अतः शृङ्गारादीनां रसानां सम्बन्धः केनचित् अलङ्कारेण सह योजयितुं न शक्यः। अलङ्काराः भावसामान्यम् आश्रयन्ते। क्वचित् एवम् अपि शङ्का जायेत यत् व्याजस्तुत्यादिषु अलङ्कारेषु स्तुतिनिन्दादिभावाः दृश्यन्ते एव तर्हि अलङ्काराणां सम्बन्धः विशिष्टभावेन भवति खलु ? तत्र उच्यते, व्याजस्तुत्यादि-अलङ्काराणाम् अलङ्कारत्वं स्तुतिनिन्दादिभावेषु निहितं नास्ति अपि तु प्रक्रियाविशेषे निहितम् अस्ति।

## अलङ्काराणाम् आधाराभूता मनोवैज्ञानिकी प्रक्रिया

अधिकालङ्कारे आश्रयाश्रयिणोः आधिक्यं चमत्कृतिजनकं भवति। जयरथेन अलङ्कारसर्वस्वस्य टीकायाम् उक्तं यत् एतद् आधिक्यं कविप्रतिभाकल्पितमेव अपेक्ष्यते इति। **'तच्च आधिक्यम् आश्रयाश्रयिणोः कविप्रतिभाकल्पितमेव ग्राह्यम्'**[2] इति। एतेन ज्ञायते उपमादिषु यत् सादृश्यं चमत्कारजनकं भवति, विरोधादिषु यः विरोधः चमत्कारजनकः भवति अथवा अन्येषु अलङ्कारेषु यानि चमत्कारजनकानि तत्त्वानि भवन्ति तानि कविप्रतिभकल्पितानि स्युः इति। एषा कल्पनायाः प्रक्रिया एव अलङ्काराणाम् आधारभूता मनोवैज्ञानिकी प्रक्रिया अस्ति।

मनोभावानाम् आवेगाः यदा आत्मानम् अभिव्यञ्जयितुम् इच्छन्ति तदा तेषाम् अभिव्यञ्जनस्य कार्यं कल्पना एव करोति। एतस्याः कल्पनायाः कार्यं स्मृतिः, बिम्बप्रतिबिम्बभावः, प्रतीकीकरणं साहचर्यम् इति एतेषां माध्यमेन भवति। एतद् कथं प्रचलति इति क्रमशः पश्यामः। आदौ कल्पनाविषये जानीमः।

### कल्पना

क्लृप् इत्यस्मात् धातोः णिचि भावे युच् कृत्वा टाप् प्रत्यये कृते कल्पना इति पदं निष्पद्यते। अवकल्कनम् अर्थात् मिश्रीकरणं, रचना, विधानम्, अनुमितिः इत्यादयः अस्य अर्थाः भवन्ति। अत्र तु रचना अथवा सर्जनम् इति अर्थः अपेक्षितः अस्ति। कल्पना अर्थात् बुद्धेः तादृशी शक्तिः या इन्द्रियाणां पुरतः अनुपस्थितानां वस्तूनां सर्जनं करोति। एषा एव कल्पना राजशेखरादिभिः प्रतिभापदेन व्याख्याता। **"या शब्दग्राममर्थसार्थमलङ्कार-तन्त्रमुक्तिमार्गमन्यदपि तथाविधमधिहृदयं प्रतिभासयति सा प्रतिभा। प्रतिभावतः पुनः अपश्यतोऽपि प्रत्यक्ष इव"**।[3] अर्थात् या शब्दसङ्ग्रहम्, अर्थम्, अलङ्कारतन्त्रम्, उक्तिमार्गम्, अन्यत् अपि अधिहृदयं प्रतिभासयति सा प्रतिभा। प्रतिभावतः पुरुषस्य कृते अप्रत्यक्षः अर्थः अपि प्रत्यक्षः इव भासते। काव्यप्रकाशस्य टिप्पण्यां रुद्रकोशोक्तं प्रज्ञायाः लक्षणं प्रदत्तम् अस्ति **"प्रज्ञानवनवोन्मेषशालिनी**

[2] अलङ्कारसर्वस्वम्, विमर्शिनी, पृ.१३४

[3] काव्यमीमांसा, चतुर्थः अध्यायः

**प्रतिभोच्यते"**[4] इति। अर्थात् नवीनानाम् अर्थानाम् उद्भाविनी प्रज्ञा प्रतिभा इति। एतेन ज्ञायते आधुनिकमनोविज्ञाने कल्पना पदेन या शक्तिः व्यपदिश्यते सा एव संस्कृतवाङ्मये प्रतिभापदेन अभिहिता अस्ति।

एषा कल्पना द्विविधा भवति नियन्त्रितकल्पना अनियन्त्रितकल्पना च । कमपि उद्देश्यम् अधिकृत्य कृता कल्पना नियन्त्रितकल्पना इति उच्यते। एषा एव सक्रियकल्पना इत्यपि कथ्यते। अनियन्त्रितकल्पना व्यक्तेः चेतननियन्त्रणात् स्वतन्त्रा भवति। एषा एव निष्क्रियकल्पना इति कथ्यते। उदाहरणार्थं दिवास्वप्नबुद्धिभ्रंशादिषु एषा कल्पना दृश्यते।[5] अलङ्कारादिषु नियन्त्रितकल्पनायाः उपयोगः भवति। यद्यपि कल्पनाविस्तारस्य स्वातन्त्र्यं कवेः भवति तथापि अलङ्कारेषु कल्पनाविस्तारस्य सन्दर्भे कविसमयस्य पालनम् अपि अनिवार्यं भवति। यथा अधिकालङ्कारे आधाराधेययोः पृथुलत्वं कविप्रतिभोत्थापितम् अपेक्ष्यते परं तत् लोकप्रसिद्धम् अपि स्यात् इति उक्तम् अस्ति । अत एव भूमण्डल-जलधि-गगन-मेर्वादिरूपं पृथुलत्वम् अधिकालङ्कारे ग्राह्यं भवति। एषा कल्पना स्मृतिम् आश्रयते अतः स्मृतिविषये जानीमः।

## स्मृतिः

**'संस्कारमात्रजन्यं ज्ञानं स्मृतिः'** इति न्यायशास्त्रे उक्तम्। अर्थात् अनुभूतस्य वस्तुनः संस्कारः आत्मनि भवति तस्मात् संस्कारात् तस्य वस्तुनः स्मरणं जायते एषा एव स्मृतिः। कल्पना सर्वदा स्मृतिम् आश्रयति। स्मृतं वस्तु एव कल्पनामाध्यमेन नवं रूपं स्वीकरोति। यथा कश्चन कविः आकाशम् अपि जानाति उद्यानम् अपि जानाति। एषः कविः काव्ये आकाशोद्यानस्य कल्पनां करोति । एतद् आकाशोद्यानं तु कल्पनामात्रं भवति । अतः स्मृतिः नास्ति चेत् कल्पना अपि न स्यात् । एतस्याः स्मृतेः साहचर्यादिचतुर्दशनियमाः हेतुभूताः सन्ति। एतेषां माध्यमेन स्मृतिः जायते।

## साहचर्यादिनियमाः

साहचर्यस्य नियमः अलङ्काराणां कृते महत्त्वपूर्णः अस्ति । केनचित् वस्तुना कस्यचित् अन्यस्य वस्तुनः स्मरणं साहचर्यनियमात् एव भवति। उदा. दिनम् इति वदामः चेत् रात्रिः स्मर्यते। उपमादिषु सादृश्यकल्पने अयं साहचर्यनियमः एव साहाय्यं करोति। अतः साहचर्यनियमः स्मृतेः हेतुः भवति। आधुनिकमनोविज्ञाने त्रयः स्मृतिहेतवः अर्थात् नियमाः उक्ताः सन्ति। सामीप्यस्य नियमः, समानतायाः नियमः, विरोधस्य नियमः च। संस्कृतवाङ्मये तु चतुर्दश स्मृतिहेतवः दर्शिताः सन्ति।

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**
**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥**
**सामाथ्र्यमौचिती देशः कालो व्यक्तिः स्वरादयः।**
**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥**[6]

संयोगः, विप्रयोगः, साहचर्यं, विरोधिता, अर्थः, प्रकरणं, लिङ्गम् अर्थात् धर्मः, अन्यशब्दस्य सन्निधिः, सामर्थ्यम्, औचितिः, देशः, कालः, व्यक्तिः अर्थात् पुंस्त्वादि, स्वरः च इति एते चतुर्दश स्मृतेः हेतवः सन्ति।

---

[4] काव्यप्रकाशः, पृ.१२
[5] रीतिकालीन अलंकार साहित्य का शास्त्रीय विवेचन पृ.४७४
[6] साहित्यदर्पणम्, द्वितीयपरिच्छेदः

तत्र संयोगः यथा 'सशङ्खचक्रो हरिः' हरिः इति पदस्य सिंहः इत्यपि अर्थः भवति परम् अत्र शङ्खचक्रसंयोगात् हरिः अर्थात् विष्णुः इति स्मर्यते । विप्रयोगः यथा 'अशङ्खचक्रो हरिः' अत्रापि पूर्ववदेव । साहचर्यं यथा 'भीमार्जुनौ' अर्जुनः वृक्षः अपि अस्ति अत्र भीमपदस्य साहचर्यात् कुन्तीपुत्रः पार्थः इति स्मर्यते । विरोधिता यथा 'कर्णार्जुनौ' कर्णः इत्यस्य श्रवणम् इति अपि अर्थः भवति परम् अर्जुनकर्णयोः विरोधिता प्रसिद्धा अतः अत्र राधेयः कर्णः स्मर्यते । अर्थस्य नियामकत्वं यथा 'स्थाणुं वन्दे' अत्र स्थाणुः इत्यस्य शङ्कुः इत्यपि अर्थः, परम् अभिवादनस्य प्रयोजनम् अस्ति भवच्छेदः तत् शङ्कौ न घटते अतः स्थाणुः इत्यस्य शिवः इति अर्थः स्मर्यते । प्रकरणस्य नियामकत्वं यथा 'सर्वं जानाति देवः' अत्र देवपदेन त्रिदशनृपयोः सन्देहः परं राजसम्बद्धे दूतकथाप्रकरणे इदं वाक्यं प्रयुक्तम् अतः देव पदस्य नृपः इति अर्थः अत्र स्मर्यते । लिङ्गस्य अर्थात् धर्मस्य नियामकत्वं यथा 'कुपितो मकरध्वजः' इत्यत्र मकरध्वजपदेन कामसमुद्रयोः निर्देशः, परं कोपरूपप्राणिधर्मस्य कामे सम्भवात् कामः इति अर्थः अत्र स्मर्यते । अन्यशब्दस्य सन्निधेः नियामकत्वं यथा 'देवः पुरारिः' अत्र पुरारिः पदेन त्रिपुरासुरहन्ता शिवः वा अन्यः शत्रुपुरनाशकः कश्चन नृपः इति सन्देहः भवति । देवतावाचकस्य समानविभक्त्यन्तस्य देवपदस्य सान्निध्यात् पुरारिः शिवः इति स्मर्यते । सामर्थ्यस्य नियामकत्वं यथा 'मधुना मत्तः पिकः' अत्र मधुपदेन मद्यवसन्तयोः सन्देहः । मद्येन पिकस्य मत्तता अप्रसिद्धा अतः मधुः अर्थात्त मधुपदस्य वसन्तः इति अर्थः । औचित्याः नियामकत्वं यथा 'यातु वो दयिता मुखम्' अर्थात् मानं विहाय प्रिया तव साम्मुख्यं प्राप्नोतु इति अर्थः । 'यातु मुखम्' इत्यत्र मुखं प्रविशतु उत साम्मुख्यं प्राप्नोतु इति सन्देहः । अत्र दयितायाः साम्मुख्यप्राप्तिः एव उचिता अतः साम्मुख्यं प्राप्नोतु इति अर्थः स्मर्यते । देशस्य नियामकत्वं यथा 'विभाति गगने चन्द्रः' इत्यत्र चन्द्रः कर्पूरः शशी वा इति सन्देहः । शशिनः गगनदेशसम्भवात् चन्द्रः इति अर्थः स्मर्यते । कालस्य नियामकत्वं यथा 'निशि चित्रभानुः' अत्र चित्रभानुः इत्यनेन सूर्यो वा वह्निः इति सन्देहः रात्रिकाले सूर्यस्य असम्भवात् अत्र वह्निः इति अर्थः स्मर्यते । व्यक्तेर्नियामकत्वं यथा 'भाति रथाङ्गम्' इत्यत्र चक्रचक्रवाकयोः सन्देहः । रथाङ्गम् इत्यस्य नपुंसकत्वात् चक्रं स्मर्यते । स्वरस्य नियामकत्वं काक्वादिषु वृत्तिषु दृश्यते ।

एवम् एतेषां चतुर्दशहेतूनां द्वारा स्मरणं भवति । स्मृतस्य वस्तुनः घटनायाः वा बिम्बं मनःपटले जायते ।

## बिम्बप्रतिबिम्बभावः

मनोविज्ञाने कल्पनायाः परिभाषा एवम् उक्ता अस्ति "पूर्वानुभूतानां वस्तूनां घटनानां वा बिम्बरूपेण अलङ्करणस्य मानसिकी प्रक्रिया एव कल्पना" इति । प्रत्यक्षज्ञानेन वस्तुनः संस्कारः मनसि भवति । यदा वस्तूनि गोचराणि न भवन्ति तदा तेषां चित्राणि मनःपटले आयान्ति । एतानि चित्राणि एव बिम्बानि अथवा प्रतिमाः इति उच्यन्ते । एतानि बिम्बानि न केवलं रूपवतां वस्तूनां भवन्ति अपि तु शब्दरसगन्धस्पर्शादीनाम् अपि भवितुम् अर्हन्ति । अतः एव शब्दस्य सुस्वरत्वम् अथवा भुक्तस्य स्वादः अस्माभिः स्मर्यते । एवं ज्ञानेन्द्रियाणाम् आधारेण एताः प्रतिमाः पञ्च प्रकारकाः भवितुम् अर्हन्ति । रूपप्रतिमा, श्रवणप्रतिमा, घ्राणप्रतिमा, स्पर्शप्रतिमा, स्वादप्रतिमा च । क्वचित् गतिप्रतिमा अपि अनुभूयते इति उक्तं परं तस्याः अन्तर्भावः रूपप्रतिमायाम् अथवा स्पर्शप्रतिमायां भवितुम् अर्हति । मनःपटले अङ्किताः एताः प्रतिमाः एव अलङ्काराणां कृते भूमिं निर्मान्ति । विभिन्नासु प्रतिमासु साधर्म्यम् अन्विष्य कविः तेषां प्रतीकीकरणं करोति ।

## प्रतीकीकरणम्

प्रतीकीकरणम् कल्पनायाः अङ्गभूतम् एव भवति। 'अनेकघटनासु विद्यमानानां समानांशानाम् एकस्मिन् बिम्बे कल्पनम् एव प्रतीकीकरणम्' इति उक्तम् अस्ति। प्रतीकीकरणस्य सम्बन्धः स्वप्नावस्थया सह योजितः अस्ति। काव्यादिषु तु स्वप्नावस्थागतस्य प्रतीकीकरणस्य सम्बन्धः नास्ति। यतो हि अत्र तु कवेः प्रत्यक्षचेतना एव अपेक्षितानां प्रतीकानां निर्माणं करोति। उदाहरणार्थं "विद्याधनम्" इति रूपकालङ्कारस्य उदाहरणे विद्यापदार्थः भिन्नः धनम् इति भिन्नम् तथापि कविना अत्र प्रतीकीकरणं कृत्वा धनं यथा सर्वं सम्पादयितुं शक्नोति तथा विद्या अपि सर्वं सम्पादयितुं शक्नोति इति प्रतिपादितम्। अत्र सम्पादनरूपस्य समानंशस्य कल्पनम् एकस्मिन् बिम्बे कृतम्। अतः अत्र प्रतीकीकरणम् अस्ति। एतत् प्रतीकीकरणं प्रायः सर्वेषु अलङ्कारेषु दृश्यते।

अलङ्कारेषु उपमानोपमेयभावः अत्यन्तप्रधानः अस्ति। उपमेयम् एव वर्ण्यविषयः भवति। अस्य उपमेयस्य उपमानकल्पनं प्रतीकीकरणस्य द्वारा एव भवति। अतः मनसः प्रतीकीकरणस्य प्रक्रिया अलङ्काराणाम् उद्भवे महत्त्वपूर्णा अस्ति। एतां मनोवैज्ञानिकीं प्रक्रियाम् उदाहरणद्वारा ज्ञातुं प्रयत्नं कुर्मः। रघुवंशे षष्ठे सर्गे इन्दुमत्याः स्वयंवरप्रसङ्गे प्रयुक्तं पद्यम् इदम्

**सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।**
**नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः॥**[7]

अर्थात् स्वयंवरे क्रमशः नृपाणां पुरतः गच्छन्ती इन्दुमती गमनसमये दीपशिखा इव आसीत्। सा यं नृपम् अतिक्रम्य गच्छति स्म तस्य मुखं विवर्णं भवति स्म इति।

अस्मिन् श्लोके उपमा अलङ्कारः अस्ति। अस्य मनोवैज्ञानिकीं प्रक्रियां पश्यामः। अत्र कविना दीपशिखा गृहाणि च पूर्वम् अनुभूतानि। रात्र्यन्धकारे गृहाणां पुरतः दीपशिखायाः गमनेन गृहाणि किञ्चित् कालं यावत् प्रकाशयुक्तानि भवन्ति अनन्तरं पुनः अन्धकारे निमग्नानि भवन्ति इति एषा घटना कविना अनुभूता। अनुभूतायाः अस्याः घटनायाः स्मृतिः तस्य आसीत्। अत्र विवर्णता इति समानः धर्मः तेन स्वीकृतः। गृहाणां वैवर्ण्ये नृपमुखाणां वैवर्ण्ये च बिम्बप्रतिबिम्बभावः लक्षितः। गृहवैवर्ण्यस्य प्रतीकीकरणं नृपमुखे तेन सम्पादितम् एवमेव इन्दुमत्यां दीपशिखायाः प्रतीकीकरणं सम्पादितम्। अत्र इन्दुमतिः उपमेयम् अस्ति दीपशिखा उपमानत्वेन कल्पिता, सञ्चारणम् इति समानधर्मः इव इति उपमावाचकं पदम् अस्ति। भूमिपालः उपमेयम् अस्ति नरेन्द्रमार्गाट्टः उपमानत्वेन कल्पितः अस्ति विवर्णता समानधर्मः इव इति उपमावाचकं पदम्। एवं कदाचित् रात्रौ दीपशिखायाः पुरतः गमनेन गृहाणां वैवर्ण्यस्य समान्यघटना कविप्रतिभया उपमालङ्करस्य उत्कृष्टम् उदाहरणं जातम्।

एवम् अलङ्काराणाम् उद्भवे मनोवैज्ञानिकी प्रक्रिया भवति। अस्याः प्रक्रियायाः सूक्ष्माध्ययनेन अलङ्काराणां वैज्ञानिकं वर्गीकरणम् अपि उपस्थापयितुं शक्येत। यद्यपि अलङ्काराः रसान् पोषयन्ति तथापि कमपि विशिष्टं भावं न आश्रयन्ति इति एतया प्रक्रियया ज्ञायते।

[7] रघुवंशम् ६.६७

**सन्दर्भ-ग्रन्थाः :**


1. झळकीकर वामन (टीककर्ता), **काव्यप्रकाशः** मम्मटः, भाण्डारकरप्राच्यविद्यासंशोधनमंदिरम् पुणे १९८३
2. द्विवेदी रेवाप्रसाद (व्याख्या), **अलङ्कारसर्वस्वम्** रुय्यकः, चौखम्बा संस्कृतभवनम्, वाराणसी २००९
3. द्विवेदी शिवप्रसाद (व्याख्या), **अग्निपुराणम्**, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली २००४
4. भट्टाचार्यः (सम्पादकः) **काव्यमीमांसा,** राजशेखरः, प्राच्यविद्यासंस्थानम् बडोदा, १९३४
5. **रघुवंशम्,** कालिदासः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी २००१
6. शर्मा ओमप्रकाशशास्त्री, **रीतिकालीन अलंकार साहित्य का शास्त्रीय विवेचन,** हिन्दी साहित्य संसार, दिल्ली १९९५
7. **साहित्यदर्पणम्,** विश्वनाथः चौखम्बा संस्कृतसंस्थानम्, वाराणसी २००१